# Contents


1 shrIrAmacandrO 2

2 rAmacandraM bhAvayAmi 3

3 rAmacandrENa saMrakShitO'haM 4

4 rAmacandrAya namaste 5

5 rAmacandrAdanyam 6

6 rAmacandrasya dAsO'ham 7

7 rAmE bharatapAlita 8

8 rAmarAma kalikaluSavirAma 9

श्री मुत्तुस्वामि दीक्षित विरचित

# राम विभक्ति कीर्तनानि

## 1 shrIrAmacandrO

### श्रीरामचन्द्रो

रागम्ः श्रीरञ्जनि ताळम्ः चापु

### पल्लवि

श्रीरामचन्द्रो रक्षतु मां राक्षसादिहरो रघुवरः

### अनुपल्लवि

भरताग्रजः कौशिकयागरक्षकः ताटकान्तकः

### चरणम्

मिथिलानगरप्रवेशमहेश्वरधनुर्भेदको

सीताकल्याणमहोत्सववैभवयुतचित्रवेषको

माधुर्यगानामृतपानप्रियगुरुगुहविश्वासो
महादेवीभक्तपरशुरामगर्वहरोल्लासः

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 2 rAmacandraM bhAvayAmi

### रामचन्द्रं भावयामि

### रागम्: वसन्त     ताळम्: रूपकम्

### पल्लवि

रामचन्द्रं भावयामि रघुकुलतिलकमुपेन्द्रम्

### अनुपल्लवि

भूमिजानायकं भुक्तिमुक्तिदायकं
नामकीर्तनतारकं नरवरं गतमायिकम्

### चरणम्

साकेतनगरे निवसन्तं साम्राज्यप्रदहनुमन्तं

राकेन्दुवदनं भगवन्तं रमणीयकल्याणगुणवन्तं

काकुस्थं धीमन्तं कमलाक्षं श्रीमन्तं
नाकेशनुतमनन्तं नरगुरुगुहविहरन्तम्

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 3 rAmacandrENa saMrakShitO'haM

# रामचन्द्रेण संरक्षितोऽहम्

## रागम्ः माञ्जि ताळम्ः रूपकम्

### पल्लवि

रामचन्द्रेण संरक्षितोऽहं सीता-

### अनुपल्लवि

रमाभारतीगौरीरमणस्वरूपेण श्री

### चरणम्

कामकोटिसुन्दरेण कमनीयकन्धरेण

कोमलघनश्यामेन कोदण्डरामेण

मामकहृदयस्थितेन मारुतिगीतामृतेन
मञ्जीरमणिमण्डितमद्गुरुगुहमानितेन

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 4 rAmacandrAya namaste

# रामचन्द्राय नमस्ते

## रागम्ः तोडि ताळम्ः मिश्र चापु

## पल्लवि

रामचन्द्राय नमस्ते राजीवलोचनाय वराय

## अनुपल्लवि

सामगानलोलाय साधुजनादिपालाय
कोमळतरगुरुगुहनुताय कोटिमारलावण्याय

## चरणम्

दशरथराजकुमाराय दण्डकारण्यविहाराय

कौशिककृतमखरक्षकाय कनकमणिमालाधराय

दशग्रीवप्राणहराय दासविभीषणपालकाय
कुशलवसीतासमेताय कपिबृन्दादिमनोहराय

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 5 rAmacandrAdanyam

# रामचन्द्रादन्यम्

## रागम्ः धन्याशि    ताळम्ः खण्ड चापु

## पल्लवि

रामचन्द्रादन्यं न जानेऽहं श्री हरिहरात्मरूपिणो

## समष्टिचरणम्

कामजनकात्कठिनसुबाहुमारीचखरदूषणादि-

मदहरणान्तकरूपिणो समस्तसुरसन्नुतशरचापपाणिनः
सरसगुरुगुहसङ्गीततत्वबोधिनः

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 6 rAmacandrasya dAsO'ham

# रामचन्द्रस्य दासोऽहम्

## रागम्ः धामवति ताळम्ः आदि

## पल्लवि

रामचन्द्रस्य दासोऽहं
श्रीसीतानायकस्य गुरुगुहहितस्य

## समष्टिचरणम्

सामदानभेदादिचतुरस्य सज्जनपालस्य दुष्टहरस्य
समयाचारसंप्रदायकस्य शबरीमोक्षप्रदस्य वरस्य

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 7 rAmE bharatapAlita

### रामे भरतपालित

### रागम्: ज्योति ताळम्: खण्ड चापु

### पल्लवि

रामे भरतपलितराज्यमर्पयामि
राजाधिराजपूजितचरणं नमामि

### समष्टिचरणम्

अमरेशादिसकलदेवतामोदने

अन्तरङ्गगुरुगुहानन्दमृदुगदने

समस्तमुनिगणसाधुजनादिवन्दने
सानन्दयुतसीतामनोहरमदने

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠

## 8 rAmarAma kalikaluSavirAma

# रामराम कलिकलुषविराम

### रागम्: रामकलि      ताळम्: रूपकम्

### पल्लवि

रामराम कलिकलुषविराम धराभृल्ललाम

### समष्टिचरणम्

श्रीमहिजाकाम सुगुणधाम परन्धाम श्याम
मामव शिवगुरुगुहसुत्राम विबुधविनुतनाम

✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠ ✠